# सुन्दरकाण्ड दशमः सर्गः(१०) - ॥ मन्दोदरीदर्शनम् ॥

तत्र दिव्योपमं मुख्यं स्फाटिकं रत्न भूषितम् ।
अवेक्षमाणो हनुमान् ददर्श शयनासनम् ॥ १ ॥

दान्त काञ्चन चित्राङ्गैर् वैडूर्यैश्च वरासनैः ।
महार् हास्तरणो पेतै रुपपन्नं महाधनैः ॥ २ ॥

तस्य चैकतमे देशे सोऽग्र्यमाला विभूषितम् ।
ददर्श पाण्डुरं छत्रं ताराधिपति सन्निभम् ॥ ३ ॥

जातरूप परिक्षिप्तं चित्रभानु समप्रभम् ।
अशोकमाला विततं ददर्श परमासनम् ॥ ४ ॥

वालव्यजन हस्ताभिर् वीज्यमानं समन्ततः ।
गन्धैश्च विविधैर् जुष्टं वरधूपेन धूपितम् ॥ ५ ॥

परमास् तरणास्तीर्ण माविकाजिन संवृतम् ।
दामभिर् वरमाल्यानां समन्ता दुपशोभितम् ॥ ६ ॥

तस्मिन् जीमूत सङ्काशं प्रदीप्तोत्तम कुण्डलम् ।
लोहिताक्षं महाबाहुं महारजत वाससम् ॥ ७ ॥

लोहितेनानु लिप्ताङ्गं चन्दनेन सुगन्धिना ।
सन्ध्या रक्त मिवाकाशे तोयदं सतटिद्गणम् ॥ ८ ॥

वृत माभरणैर् दिव्यैः सुरूपं कामरूपिणम् ।
सवृक्ष वन गुल्माढ्यं प्रसुप्त मिव मन्दरम् ॥ ९ ॥

क्रीडित् वोपरतं रात्रौ वराभरण भूषितम् ।
प्रियं राक्षस कन्यानां राक्षसानां सुखावहम् ॥ १० ॥

पीत्वाप्युपरतं चापि ददर्श स महाकपिः ।
भास्वरे शयने वीरं प्रसुप्तं राक्षसाधिपम् ॥ ११ ॥

निःश्वसन्तं यथा नागं रावणं वानरर्षभः ।
आसाद्य परमोद्विग्नः सोऽपासर्पत् सुभीतवत् ॥ १२ ॥

अथारोहण मासाद्य वेदिकान्तर माश्रितः ।
सुप्तं राक्षस शार्दूलं प्रेक्षते स्म महाकपिः ॥ १३ ॥

शुशुभे राक्षसेन्द्रस्य स्वपतः शयनोत्तमम् ।
गन्ध हस्तिनि संविष्टे यथा प्रस्रवणं महत् ॥ १४ ॥

काञ्च नाङ्गद नद्धौ च ददर्श स महात्मनः ।
विक्षिप्तौ राक्षसेन्द्रस्य भुजाविन्द्र ध्वजोपमौ ॥ १५ ॥

ऐरावत विषाणाग्रै रापीडन कृतव्रणौ ।
वज्रोल्लिखित पीनांसौ विष्णु चक्र परिक्षतौ ॥ १६ ॥

पीनौ सम सुजातांसौ सङ्गतौ बल सम्युतौ ।
सुलक्षण नखाङ्गुष्ठौ स्वङ्गुली तल लक्षितौ ॥ १७

संहतौ परिघाकारौ वृत्तौ करिकरोपमौ ।
विक्षिप्तौ शयने शुभ्रे पञ्चशीर्षा विवोरगौ ॥ १८ ॥

शशक्ष तज कल्पेन सुशीतेन सुगन्धिना ।
चन्दनेन परार्ध्येन स्वनुलिप्तौ स्वलङ्कृतौ ॥ १९ ॥

उत्तमस्त्री विमृदितौ गन्धोत्तम निषेवितौ ।
यक्ष पन्नग गन्धर्व देव दानव राविणौ ॥ २० ॥

ददर्श स कपिस् तस्य बाहू शयन संस्थितौ ।
मन्दरस्यान्तरे सुप्तौ महाही रुषिताविव ॥ २१ ॥

ताभ्यां स परिपूर्णाभ्यां भुजाभ्यां राक्षसेश्वरः ।
शुशुभेऽचल सङ्काशः शृङ्गाभ्या मिव मन्दरः ॥ २२ ॥

चूतपुन्नाग सुरभिर् वकुलोत्तम सम्युतः ।
मृष्टान्न रस सम्युक्तः पान गन्धपुरःसरः ॥ २३ ॥

तस्य राक्षस सिंहस्य निश्चक्राम महामुखात् ।
शयानस्य विनिःश्वासः पूरयन्निव तद् गृहम् ॥ २४ ॥

मुक्तामणि विचित्रेण काञ्चनेन विराजितम् ।
मुकुटे नापवृत्तेन कुण्डलोज् ज्वलिताननम् ॥ २५ ॥

रक्त चन्दन दिग्धेन तथा हारेण शोभिना ।
पीनायत विशालेन वक्षसाभि विराजितम् ॥ २६ ॥

पाण्डरे णापविद्धेन क्षौमेण क्षतजेक्षणम् ।
महार्हेण सुसंवीतं पीतेनोत्तम वाससा ॥ २७ ॥

माषराशि प्रतीकाशं निःश्वसन्तं भुजङ्गवत् ।
गाङ्गे महति तोयान्ते प्रसुप्तमिव कुञ्जरम् ॥ २८ ॥

चतुर्भिः काञ्चनैर् दीपैर् दीप्यमान चतुर्दिशम् ।
प्रकाशी कृत सर्वाङ्गं मेघं विद्युद्गणै रिव ॥ २९ ॥

पादमूल गताश्चापि ददर्श सुमहात्मनः ।
पत्नीः स प्रिय भार्यस्य तस्य रक्षःपतेर्गृहे ॥ ३० ॥

शशि प्रकाश वदनाश् चारु कुण्डल भूषिताः ।
अम्लान माल्याभरणा ददर्श हरियूथपः ॥ ३१ ॥

नृत्त वादित्र कुशला राक्षसेन्द्र भुजाङ्कगाः ।
वराभरण धारिण्यो निषण्णा ददृशे हरिः ॥ ३२ ॥

वज्र वैडूर्य गर्भाणि श्रवणान्तेषु योषिताम् ।
ददर्श तापनीयानि कुण्डलान् यङ्गदानि च ॥ ३३ ॥

तासां चन्द्रोपमैर् वक्त्रैः शुभैर् ललित कुण्डलैः ।
विरराज विमानं तन् नभस् तारागणै रिव ॥ ३४ ॥

मदव्याया मखिन्नास्ता राक्षसेन्द्रस्य योषितः ।
तेषु तेष् ववकाशेषु प्रसुप्तास् तनुमध्यमाः ॥ ३५ ॥

अङ्गहारैस् तथैवान्या कोमलैर् नृत्तशालिनी ।
विन्यस्त शुभ सर्वाङ्गी प्रसुप्ता वरवर्णिनी ॥ ३६ ॥

काचिद् वीणां परिष्वज्य प्रसुप्ता सम्प्रकाशते ।
महानदी प्रकीर्णेव नलिनी पोत माश्रिता ॥ ३७ ॥

अन्या कक्ष गतेनैव मड्डुकेना सितेक्षणा ।
प्रसुप्ता भामिनी भाति बाल पुत्रेव वत्सला ॥ ३८ ॥

पटहं चारु सर्वाङ्गी पीड्य शेते शुभस्तनी ।
चिरस्य रमणं लब्ध्वा परिष्वज्येव भामिनी ॥ ३९ ॥

काचिद्वंशं परिष्वज्य सुप्ता कमल लोचना ।
रहः प्रियतमं गृह्य सकामेव च कामिनी ॥ ४० ॥

विपञ्चीं परिगृह् यान्या नियता नृत्त शालिनी ।
निद्रावश मनुप्राप्ता सह कान्तेव भामिनी ॥ ४१ ॥

अन्या कनक सङ्काशै मृंदु पीनैर्मनोरमैः ।
मृदङ्गं परिपीड्याङ्गैः प्रसुप्ता मत्त लोचना ॥ ४२ ॥

भुज पार्श्वान् तरस्थेन कक्षगेन कृशोदरी ।
पणवेन सहानिन्द्या सुप्ता मदकृतश्रमा ॥ ४३ ॥

डिण्डिमं परिगृह्यान्या तथै वासक्त डिण्डिमा ।
प्रसुप्ता तरुणं वत्स मुपगूह्येव भामिनी ॥ ४४ ॥

काचि दाडम्बरं नारी भुज सम्योग पीडितम् ।
कृत्वा कमल पत्राक्षी प्रसुप्ता मद मोहिता ॥ ४५ ॥

कलशीमप विद्ध्यान्या प्रसुप्ता भाति भामिनी ।
वसन्ते पुष्प शबला मालेव परिमार्जिता ॥ ४६ ॥

पाणिभ्यां च कुचौ काचित् सुवर्ण कलशोपमौ ।
उपगूह्या बला सुप्ता निद्रा बल पराजिता ॥ ४७ ॥

अन्या कमल पत्राक्षी पूर्णेन्दु सदृशानना ।
अन्या मालिङ्ग्य सुश्रोणीं प्रसुप्ता मद विह्वला ॥ ४८ ॥

आतोद्यानि विचित्राणि परिष्वज्य वरस्त्रियः ।
निपीड्य च कुचैः सुप्ताः कामिन्यः कामुका निव ॥ ४९ ॥

तासा मेकान्त विन्यस्ते शयानां शयने शुभे ।
ददर्श रूप सम्पन्ना मपरां स कपिः स्त्रियम् ॥ ५० ॥

मुक्तामणि समायुक्तर् भूषणैः सुविभूषिताम् ।
विभूषयन्ती मिव तत् स्वश्रिया भवनोत्तमम् ॥ ५१ ॥

गौरीं कनक वर्णाङ्गी मिष्टामन्तः पुरेश्वरीम् ।
कपिर् मन्दोदरीं तत्र शयानां चारु रूपिणीम् ॥ ५२ ॥

स तां दृष्ट्वा महाबाहुर् भूषितां मारुतात्मजः ।
तर्कयामास सीतेति रूप यौवन सम्पदा ।
हर्षेण महता युक्तो ननन्द हरियूथपः ॥ ५३ ॥

आस्फोटयामास चुचुम्ब पुच्छं
ननन्द चिक्रीड जगौ जगाम ।
स्तम्भान रोहन् निपपात भूमौ
निदर्शयन् स्वाम् प्रकृतिं कपीनाम् ॥ ५४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे दशमः सर्गः
॥ १० ॥